Paper Code No.: **04**

**SET - 1**

# HIGHER SECONDARY EDUCATION

## Half Yearly Examination-2017- 18

**Second Language**

**Part II**

**STD - XI** **SANSKRIT**

**Total Score : 80**
**Time : 2 ½ Hours**
**Cool off Time : 15 Minutes**

## निर्देशाः

- सर्वे प्रश्नाः समाधेयाः।
- प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरयत।
- प्रश्नानां वाचनय १५ निमेषाः कल्पिताः।

---

**I. समुचितानि उत्तराणि कोष्ठकात् निर्धार्य लिखत।** **(5x1=5)**

क. आदिकाव्यं किम्?
(महाभारतम्, रामायणम्, भगवद्गीता)

ख. 'अष्टाध्यायी' इति ग्रन्थस्य रचयिता कः?
(पाणिनिः, वाल्मीकिः, कालिदासः)

ग. 'चिन्ताविष्टयाय सीता' इति कैरलीकाव्यस्य संस्कृतानुवादकः कः?
(अनन्तशास्त्री, एन्. गोपालप्पिल्ला, मेल्पत्तूर)

घ. शरीरायासजननं कर्म किम्?
(स्नानं, दिनचर्या, व्यायामः)

ङ. अङ्गराजः कः?
(अर्जुनः, कर्णः, भीमः)

**II. क विभागस्य श्लोकांशाः ख विभागात् चित्वा लिखत।** **(4)**

| क | ख |
|---|---|
| 1. दोषेण तीव्रो विषयः<br>कृष्णसर्पविषादपि | 1. राजाहमिति शब्दान्नो<br>राजा भवितुमर्हति। |
| 2. अकृत्वा शत्रुसंहारम्<br>अगत्वाखिलभूश्रियम् | 2. क्षुधादिकृतदुःखं तु।<br>विना स्वेन न केनचित् |
| | 3. विषं निहन्ति भोक्तारं<br>द्रष्टारं चक्षुषाप्ययम्। |

**III. श्रेणीं पूरयत।** **(4)**

7. अमङणनम्।
6. ——
5. ——
4. ऐऔच्
3. ——
2. ——
1. अइउण्

**IV. अधोदत्तस्य श्लोकस्य गद्यक्रमं लिखत।** **(4)**

अथवातिमनोहराद्बहि-
र्जगतो मे विरहो न सम्भवेत्।
अवनौ च तनुर्मनोरथो
मम चैषां सुषमासु लेष्यते।।

अथवा ——— जगतः बहिः मे ———— न सम्भवेत् मम तनुः ———— च अवनौ एषां ———— लेष्यते।

**V. अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत।** **(2)**

**क)** उदाहरणानुसारं पदच्छेदं लिखत।

उदा - तत्रैव - तत्र + एव।
तेनैव - ——— + ———।
स्वेनैव - ——— + ———।

**ख)** अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति उदाहरणानुसारं लिखत।

| उदाहरणम् — कथनम् | कः | कं प्रति |
|---|---|---|
| महत्तरां भिक्षां याचे। | शक्रः | कर्णम्। |
| 1. यत्रासावर्जुनः तत्रैव चोद्यतां मम रथः। | ———— | ————। |
| 2 भगवन् किं न वक्तव्यम् दीर्घायुर्भवेति ? | ———— | ————। |

**VI. अधः प्रदत्ताभ्यां प्रश्नाभ्याम् एकस्य उत्तरं लिखत। (8)**

**क. द्वौ नाटकसङ्केतौ अधिकृत्य टिप्पणीं लिखत।**

1. प्रकाशम्, 2.आत्मगतम्, 3. नेपथ्यम्।

**ख. कर्णस्य दानशीलम् अधिकृत्य सूचनानुसारम् एकां खण्डिकां लिखत।**

सूचनाः- महत्तरां भिक्षां याचे, महत्तरां भिक्षां भवते प्रदास्ये, गोसहस्रं-वाजिनां - वारणानां - कनकं- पृथिवीं - मम देहरक्षा।

**VII. इष्टतमः श्लोकः कः इति सकारणं लिखत। (7)**

1. विशिखा निशिता विरम्यताम्
क्षतमेयात् स्तिमितं न मे मनः।
पुरतो भ्रम लोकचक्र मां
त्यज सीतामिह तां हतामहो।।

2. न हि देहिनि शोभनं भवे-
च्चरितार्थे सति जीवितं पुनः।
सुतरां नटने समापिते
स च रङ्गाद्विरमेत् कुशीलवः।।

**VIII. पेटिकातः क्त्वान्त -ल्यबन्त- तुमुन्नन्त अव्ययपदानि चित्वा लिखत। (3)**

| |
|---|
| भवति, प्राप्य, लिखसि, गृहीत्वा, गन्तुम्, गच्छति। |

1. क्त्वान्तं ————।
2. ल्यबन्तं ————।
3. तुमुन्नन्तं ————।

**IX. मालिनी इत्यत्र गणः कः? (1)**

(रगणः, यगणः, तगणः)

**X. अधो दत्ताभ्यां प्रश्नाभ्यां एकस्य उत्तरं लिखत। (6)**

**क)** पेटिकातः वृत्तलक्षणं योजयित्वा लिखत।

| क | ख |
|---|---|
| 1. जतौ तु वंशस्थम् | जतजास्ततो गौ । |
| 2. स्यादिन्द्रवज्रा | उदीरितं जरौ। |
| 3. उक्ता वसन्ततिलका | यदि तौ जगौ गः। |
| 4. उपेन्द्रवज्रा | तभजा जगौ गः। |

ख) श्लोकं पठित्वा वृत्तं लक्षणं च लिखत।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमाना
प्रारब्धमुत्तमजना न परित्यजन्ति।।

**XI. आशयानुसारं क्रमीकुरुत।** **(3)**

| क | ख |
|---|---|
| 1. चरकः आयुर्वेदाचार्यः भवति। | - ആരോഗ്യത്തിന് വ്യായാമം ആവശ്യമാണ്. |
| 2. शरीरारोग्याय व्यायामम् आवश्यकम्। | - ശുചിത്വം ആരോഗ്യത്തിന് ആവശ്യമാണ്. |
| 3. शुचित्वम् आरोग्याय आवश्यकम्। | - ചരകൻ ആയുർവേദാചാര്യനാണ്. |

**XII. क्रियापदम् उदाहरणानुसारं परिवर्तयत।** **(3)**

उदा- पठति - अपठत्।

1. लिखति ———।
2. गच्छति ———।
3. पिबति ———।

**XIII. क विभागे प्रदत्तस्य समानाशययुक्तं श्लोकं ख विभागात् चित्वा लिखत।** **(2)**

**क-आशयः**

दुर्जनानां सज्जनानां च मैत्री विभिन्ना।

**ख-श्लोकः**

1. साहित्यसङ्गीतकलाविहीनः
साक्षात् पशुः पुच्छविषाणहीनः
तृणं नखादन्नपि जीवमानः
तद् भागधेयं परमं पशूनाम्।।

2. आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम्।

**XIV. अधः प्रदत्तं गद्यभागं पठित्वा वसिष्ठरत्नाकरयोः मिथः संभाषणं सम्भाव्य लिखत।** **(6)**

"रत्नाकरो नाम निषादोऽहम्। पथिकानां धनानि अवश्यञ्चेत् प्राणान् च अपहृत्य कुटुम्बं पोषयामि" सः प्रत्यवदत्।"एवं वा? पतिधर्म एव कुटुम्बपालनं, किन्तु पथिकानां धनप्राणापहरणं किं न पापाय? अस्य पापस्य तव कलत्रपुत्रादयः फलभाजः किम्?" - मुनिरपृच्छत् । "तदहं न जाने" इति निषादेन उक्ते "एवं चेत् तान् पृष्ट्वा आगच्छतु तावत्कालं अत्रैव तिष्ठामः" इति मुनिरवदत्।

सूचना-

निषादः - ______________

वसिष्ठः - ______________

निषादः - ______________

वसिष्ठः - ______________

**XV. अधोदत्ताभ्यां प्रश्नाभ्यां एकस्य उत्तरं लिखत। (7)**

**क. आयुर्वेदरीतिमवलम्ब्य स्वदिनचर्यां लिखत।**

सूचना - * प्रभाते उत्तिष्ठति, *व्यायामं करोति, * स्नानं करोति, * प्रार्थनां कृत्वा पठति, *विद्यालयं गच्छति, * सन्ध्यावन्दनं करोति, * शेते।

**ख. समयवाचकशब्दानुपयुज्य दिनचर्यापट्टिकां पूरयत।**

रमेशः ब्राह्ममुहूर्त्ते उत्तिष्ठति। सः (5 am) ——— दन्तधावनं करोति। ———(5.30am) स्नानं कृत्वा प्राणायामं ध्यानं च अनुतिष्ठति। ———(6.15am) पठति। —— (8.45am) विद्यालयं गच्छति। सायं काले ——(5.pm) गृहं प्रति आगच्छति। ——— (6.30pm) सन्ध्यावन्दनं करोति। ———(9.00pm) पठति।

**XVI. खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत। (4)**

पुरा तक्षशिला नाम काचित् सर्वकलाशाला आसीत्। तत्र महान् आचार्यः उपवर्षः शिष्यान् अध्यापयन् आसीत्। शिष्येषु अन्यतमः दाक्षीपुत्रः पाणिनिः। सर्वे सतीर्थ्याः मूढधीः पाणिनिः इत्येवं पाणिनिं परिहसन्ति स्म।

1. सर्वकलाशालायाः नाम किं आसीत्?
2. आचार्यः कः?
3. शिष्येषु अन्यतमः दाक्षीपुत्रः कः?
4. खण्डिकायाः एकम् अव्ययपदं चित्वा लिखत।

**XVII. अधोनिर्दिष्टान् कथास्थम्भान् पाठानुसारं क्रमीकुरुत। (6)**

1. राममन्त्रोच्चारणाय सम्प्रेर्य ते मुनयः अगच्छन्।
2. पश्चात्तापविवशः निषादः प्रत्यागत्य मुनेः पादयोः निपत्य क्षमामयाचत।
3. भार्यादीनां प्रतिवचनं निशम्य निषादः नितरां खिन्नः अभवत्।
4. मन्त्रध्वनेः उद्भवस्थानं एकं वल्मीकमिति ज्ञात्वा ते ऋषयः तदभञ्जयन्।
5. ते महर्षयः वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः तस्थुः।
6. अतितेजस्विनं कञ्चन मुनिश्रेष्ठं अपश्यन्।

**XVIII. यथोचितं योजयत। (5)**

| | **क** | | **ख** |
|---|---|---|---|
| 1. | कर्मणैव हि संसिद्धिः | - | शङ्कराचार्यः। |
| 2. | पुरतो भ्रम लोकचक्र | - | वाल्मीकिः। |
| 3. | शब्दाह्वयं ज्योतिः | - | कर्णः। |
| 4. | तत्त्वामृतबिन्दवः | - | सीता। |
| 5. | हुतं च दत्तं च तथैव तिष्ठति | - | पाणिनिः। |

HSE 1

**HALF YEARLY EXAMINATION 2017-18**

**SANSKRIT- SECOND LANGUAGE**

# ANSWER KEY

| Qn.No. | Sub. Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| I | क<br>ख<br>ग<br>घ<br>ङ | रामायणम्।<br>पाणिनिः।<br>एन्.गोपालपिल्ला ।<br>व्यायामः।<br>कर्णः। | 1<br>1<br>1<br>1<br>1 | 5 |
| II | 1.<br>2. | विषं निहन्ति भोक्तारम्<br>राजा अहं इति----- | 2<br>2 | 4 |
| III | | ऋलृक्, एओङ्,हयवरट्, लण् | 4x1 | 4 |
| IV | | गद्यक्रमलेखनाय । | 4 | 4 |
| V | क) | तेन+ एव,स्वेन+ एव | 2x1 | 2 |
| | ख) | 1.कर्णः शल्यं प्रति ।<br>2.कर्णः शक्रं प्रति । | (2) | (2) |
| VI | क | उचितरीत्या लेखनाय | 2x4 | 8 |
| | ख | कर्णस्य दानशीलं, सामान्य लेखनाय। | (8) | (8) |
| VII | | इष्टतम श्लोकचयनाय<br>आशय लेखनाय | 3<br>4 | 7 |
| VIII | | क्त्वान्त- गृहीत्वा।<br>ल्यबन्तं- प्राप्य।<br>तुमुन्नन्तं- गन्तुम् । | 1<br>1<br>1 | 3 |
| IX | | रगणः इति लेखनाय | 1 | 1 |
| X | क) | वृत्तलक्षण योजनाय । | 6 | 6 |
| | ख) | वृत्तं किमिति विलिख्य लक्षण लेखनाय । | (6) | (6) |
| XI | | क्रमीकरणाय । | 3 | 3 |
| XII | 1<br>2<br>3 | अलिखत् ।<br>अगच्छत् ।<br>अपिबत् । | 1<br>1<br>1 | 3 |

| | | | | |
|---|---|---|---|---|
| **XIII** | | आरम्भगुर्वी----- इति श्लोक लेखनाय । | 2 | 2 |
| **XIV** | | उचितरीत्या सम्भाषणलेखनाय । | 6 | 6 |
| **XV** | क) | सामान्यरीत्या लेखनाय । | 7 | 7 |
| | ख) | समयलेखनाय । | (7) | (7) |
| **XVI** | 1.<br>2.<br>3.<br>4. | तक्षशिला ।<br>उपवर्षः<br>पाणिनिः<br>पुरा (अव्यय लेखनाय) । | 1<br>1<br>1<br>1 | 4 |
| **XVII** | | कथास्तम्भं क्रमीकृत्य लेखनाय । | 6 | 6 |
| **XVIII** | 1<br>2<br>3<br>4<br>5 | वाल्मीकिः।<br>सीता।<br>पाणिनिः।<br>शङ्कराचार्यः।<br>कर्णः। | 1<br>1<br>1<br>1<br>1 | 5 |
| आहत्य | | | | 80 |